# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा –शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम्-८ | गुणाः – ७० |
|---|---|---|
| विषयः – फलितज्योतिषम् । | (C.E.- 3.5.10. OLD ) | समयः ३:०० तः ६:०० |
| दिनाङ्कः – १७/१०/२०१९ | सन्दर्भग्रन्थः– सरलजन्मपत्रीविज्ञानम् । | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या । १०**

(१) उरु जठरमुरःस्थलबाहुयुगपृष्ठमुत्तमाङ्गं च ।
इत्याष्टाङ्गानि नृणां भवन्ति शेषाष्युपाङ्गानि ॥

(२) अन्तमुखेन मीनद्वयेन पूर्णेन पाणितलमध्यम् ।
यस्याङ्कितं भवेदिह स धनी स चाप्रदो मनुजः ॥

(३) अधोलिखितं काकपदं धनरेखायां तु सदृशतो यस्य ।
अर्जयति धनानि पुनस्तत्क्षणमपि स व्ययं कुरुते ॥

**प्रश्नः २ अधोलिखितयोः प्रश्नयोः कस्यचिद् एकस्य उपरि निबन्धं निबन्धयतु । १०**

(१) वक्षस्थलविचारः ।

(२) नाभिलक्षणविचारः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या । १०**

(१) मस्तकमिभकुम्भनिभं भूमिभुजां मण्डलं गवाद्यानाम् ।
भोगवतां भवति समं क्रमोन्नतं मण्डलेशानाम् ॥

(२) शुभलक्षणमङ्गेभ्यः सौन्दर्येणाधिकं मुखं यस्य ।
स्वज्ञातिप्राधान्यं प्राप्नोति स धान्यधनवत्वम् ॥

(३) य सत्त्वगुणोपेतः स दयालुः सत्यवाक् स्थिरः सरलः ।
देवगुरुभक्तियुक्तो व्यसनेऽभ्युदये च कृतधैर्यः ॥

**प्रश्नः ४ निम्नलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं निबन्धयत । १०**

(१) केशलक्षणविचारः ।

(२) ललाटलक्षणविचारः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या । १०**

(१) फलपुष्पयुतो यो हि दैवतं परिपच्छति ।
तस्यैव कथये प्रश्नं सत्यं भवति नान्यथा ॥

(२) तिथिवारर्क्षयोगानां योगोनामाक्षरैर्युतः ।
सप्तभक्ताऽवशेषेणसमेकन्याऽसमेसुतः ॥

(३) ध्वजकुंजरसिंहेषु वृषे सिद्धिर्भवेद् ध्रुवम् ।
ध्वांक्षे श्वाने खरे धूम्रे कार्यसिद्धिर्भवेन्नहि ॥

**प्रश्नः ६ निम्नलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निबन्धं निबन्धयतु । १०**

(१) जीवनमरणप्रश्नज्ञानम् ।

(२) सन्तानसम्बन्धीप्रश्नविचारः ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु दशप्रश्नानाम् अतिलघूत्तरं यच्छत । १०**

(१) रोमरहितः मनुष्यः किदृशः भवति ?

(२) मनुष्याणां कति अङ्गानि ?

(३) जानुलक्षणेन शतायुः कदा भवति ?

(४) प्रासादचिह्नफलं किम् ?

(५) रथचिह्नफलं किम् ?

(६) हस्तपर्वतचिह्नफलं किम् ?

(७) कर्णलक्षणेन कदा मतिमान भवति ?

(८) दन्तलक्षणेन स्त्रिभाग्यशालिनी कदा भवति ?

(९) गन्धलक्षणेन पुरुषाः कदा दरिद्राः भवन्ति ?

(१०) बन्दीमोक्षयोः प्रश्ने सिंहायफलं किम् ?

(११) आयः कति विधः ?

(१२) प्रश्नकर्ता प्राच्यां स्यात् तदा तस्य फलं किम् ?

(१३) ध्वजायस्त्रिलाभफलं किम् ?

(१४) खराये कस्याः देव्याः पूजा भवितव्याः ?

(१५) प्रश्नाध्यायस्यान्तिमे श्लोके कस्य संस्कारस्य श्लोकः वर्तते ?

----oooo----